International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2018; 4(1): 137-139
© 2018 IJSR
www.anantaajournal.com
Received: 23-11-2017
Accepted: 25-12-2017

**डा. हेमन्त कुमार मुदुलि**
व्याकरणाध्यापकः, विजयचान्द संस्कृत महाविद्यालयः, समागोल, कुजङ्ग, जगतसिंहपुर, ओडिशा, भारत

**Correspondence**
**डा. हेमन्त कुमार मुदुलि**
व्याकरणाध्यापकः, विजयचान्द संस्कृत महाविद्यालयः, समागोल, कुजङ्ग, जगतसिंहपुर, ओडिशा, भारत

# पाणिनीय संज्ञासिद्धान्तः

**डा. हेमन्त कुमार मुदुलि**

## प्रस्तावना

व्याकरणाध्ययनस्य प्रयोजन प्रसंगे महाभाष्य कारेण व्याकरणस्य मुख्य प्रयोजन कथनावसरे उच्यते। आगम खल्वपि "ब्राह्मणेन निष्कारणोधर्मः षडङ्गोवेदोऽध्योयो ज्ञेयोश्चेति"[1]। प्रधानं च षड्षुअंगेषु व्याकरणम् प्रधाने च कृतोयत्नः फलवान् भवति।

अस्मादवधार्य्यते यत् वेदस्यषडङ्गेषु व्याकरण मपि एका वेदाङ्ग संज्ञा यत् मुख्यत्वेन प्रतिपादितो भवति। संज्ञा नाम-सम्यक् ज्ञायते अनया इति संज्ञा पाणिनीय व्याकरणे अनेकाः संज्ञाःभवन्ति प्रतिपादितानि।

## संज्ञा-

पाणिनेः समये शिक्षा-कल्प-छन्दः-व्याकरणादिविषयेषु सूत्राणि प्रणीतान्यासन्। भगवान् पाणिनिः लाघवपक्षं स्वीकृत्य सूत्राणि प्रणीतवान्। तत्र संज्ञासूत्रं संज्ञा इति अन्वर्थसंज्ञामादाय प्रतिपादितवान्।व्युत्पत्त्या कर्मसाधनं करणसाधनं भावसाधनं चेति पुरस्कृत्य संज्ञाशब्दः सार्थक्यं गतः। कैयटेन उक्तम्-संज्ञायते इति संज्ञा। एवं व्यपदिश्यमानो न दीयते अथवा संज्ञायते अनया इति संज्ञा तदा शब्द एव संज्ञाशब्देन उच्यते। संज्ञायामविषये कार्यं भवतीति अर्थः[2]। नागेशेन संज्ञायां विषये एवं व्यवह्रियमाणः[3] इत्यर्थः।अतः व्युत्पत्तित्रयक्रमेण तदाभिहितार्थं स्यापि त्रैविध्यं भवेत्। व्याख्याकाराः तदेव निगदन्ति-सम्यक ज्ञानं संज्ञा- सम्यक ज्ञायते संज्ञा। ततः शब्द संज्ञाशब्देनोच्यते। संज्ञायां विषये कार्यं भवति इति संज्ञाशब्दस्तु करणव्युत्पन्न इति बोध्यम्[4]।

---

[1]म.भा.

[2]प्रदीप 5/2/91

[3]उधोत 5/2/91

[4]उधोत 3/1/112

**कर्मसाधनसंज्ञा-**

संज्ञायते यः इति। कैयटानुसारं संज्ञाशब्दः कर्मसाधनेन रुढि।तथा हि संज्ञा शब्देन कर्मसाधनेन संज्ञायामनभिधीयते। संज्ञा बोध्यः अर्थपरकः अस्याः व्युत्पत्तेः तात्पर्यम्। [5]बृहच्छब्देन्दुशेखरे तदेव प्रतिपादितं दृश्यते। स्वं रूपं शब्दस्याशब्दसंज्ञा इति भाष्येऽपि संज्ञाशब्दः संज्ञायते यः इति व्युत्पत्तिः[6] साधिताः।

**भावसाधनसंज्ञा-**

सम्यक् ज्ञानं संज्ञा। उक्तं च बालमनोरमायाम् "[7]संज्ञानां लोके व्यवहाराणाम्"। बृहच्छब्देन्दुशेखरे संज्ञानां संज्ञा प्रतिपत्तिः [8]प्रसिद्धिः इति यावदुक्तं संज्ञाभूतानि इत्यस्य व्याख्यायां प्रसिद्धानि इति पदस्यं प्रयोगः [9]नागेशेन विहितः।

अर्थदृष्ट्या संज्ञाशब्दः द्विविधः, अवयवानुसारी अवयवार्थानुसारी तदुक्तं [10] न्यासकृता संज्ञाशब्दो हि द्विविधो भवति, केचिदवयवार्थानुगता यथा सप्तपर्ण केचित्तु विपरीता यथा तैलपायीति।

**संज्ञायाः लक्षणम्-**

प्रचीनाः आचार्याः संज्ञायाः लक्षणं समुदायोपाधिसंज्ञा इति विचारयन्ति। संज्ञायाम् 2/1/44 इति सूत्रस्य अरण्ये तिलका इति पदोपरि व्याख्यानम् इच्छता [11]विह्लणाचार्येण प्रतिपादितम्। संज्ञासमुदायोपाधित्वेन नित्यसमासोऽयं न हि वाक्येन संज्ञा गम्यते इति । भुवःसंज्ञान्तरयोः 3/2/179 इति सूत्रे प्रतिभुशब्दस्य व्याख्यानमिच्छता प्रसादकारेण यावद् द्रव्यभाविनी संज्ञा इत्युक्तम् तथाहि- [12] "न तु संज्ञायाम् इत्येव वक्तव्यम्।किमन्तरग्रहणेन यावत् द्रव्यभाविनी संज्ञा प्रतिभुशब्दः पुरूषे कादाचित्कः"। न्यासकृता एतदपि प्रतिपादितम्- "[13] ननु प्रतिभु इति संज्ञा इयं तत्र किमन्तरग्रहणेन संज्ञायाम् इति वक्तव्यम्।नैतदस्ति द्रव्यता हि संज्ञाशब्द भवन्ति।

यदा कश्चन शब्दः कस्यचित् नामविशेषस्य कृते व्यवहृतो भवति सा संज्ञा इति उच्यते।यथा देवदत्तः यज्ञदत्त इति। "संज्ञापूरणयोश्च"- पा.सू.6/3/38 इति सूत्रेण निष्पन्नस्य दत्तभार्य इति शब्दस्य व्याख्यानमिच्छता विठ्ठलाचार्येण एतत् प्रतिपादितम्। तथाहि- "[14]अस्ति एकद्रव्यनिवेशिनः संज्ञाशब्द इति। [15]बालमनोरमायामपि एषः विचारः विहितः।"

अक्तपरिमाणाऽपि संज्ञा। यस्य शब्दस्य परिमाणं नियतमर्थात् शास्त्रान्तरं विहितं कार्य यत्र न भवति तत् अक्तपरिमाणमित्युच्यते। कैयटेन एतत् स्पष्टम्- [16] अक्तपरिमाणा संज्ञा कृता। [17] शेखरकृताऽपि नियतानुपूर्विका संज्ञा इति भाष्यान्तरेण प्रतिपादितम्।[18] न्यासकृताऽपि नियतानुपूर्वीका हि संज्ञा भवतीति प्रतिपादितम्। वस्तुतस्तु संज्ञाशब्देन कः अर्थः निश्चिततया प्रतिपादनीय इति सन्दिग्धप्रायः।

पाणिनीयव्याकरणे सूत्रसंघटनोपायं पुरस्कृत्य संज्ञासूत्राणां स्वरूपं प्रकटीकुर्वन्ति। भाष्यकारः प्रकारश्चतुष्टयमाविष्करोति स्म। तथा हि-

1. यत्र तु अन्यतरलघु यत् लघु सा संज्ञा।
2. अनाकृतिः संज्ञा आकृतिमन्तः संज्ञिनः।
3. आवर्त्तिन्यः संज्ञा भवन्ति।
4. पूर्वोच्चारितः संज्ञीपरोच्चारिता संज्ञा।

एतद् भाष्ये प्रतिपादितं दृश्यते यत्-[19]"तत्र तु एतावान् सन्देहः कः संज्ञी? का संज्ञा?

---

[5]वृ.श.शे पृ.88

[6]म.भा.1/2/53

[7]वा.म.1/2/53

[8]वृ.श.शे. पृ.984

[9]उद्योतः 3/1/26

[10]न्यास 3/2/46

[11]प्रसादटीका 2/1/44

[12]प्रसादटीका 3/2/179

[13]न्यास.3/2/179

[14]प्रसादटीका 6/3/38

[15]वा.म.6/3/38

[16]प्रदीप 1/2/1

[17]श.शे.बहुव्रीहिप्रकरणे पृ.115

[18]न्यास.3/3/9

[19]

इति स चापि क्व सन्देहः यत्रोमे समानाक्षरे। यत्र अन्यतरलघु यतलघु सा संज्ञा। कृत एतत् लघ्वर्थं हि संज्ञाकरणम्। तत्र अवस्यम् गुरूलघुतामेवोपलक्षयितुमर्हति। किं तर्हि अनाकृतितामपि। अनाकृतिः संज्ञा, आकृतिःमन्तः संज्ञिनः। लोकेऽपि आकृतिमतः मांसपिण्डस्य देवदत्त इति संज्ञा क्रियते।अथवा आवर्त्तिन्यः संज्ञा भवन्ति। अपरत्रापि सूत्रे संज्ञासंज्ञीभावपुरस्सरं संज्ञासूत्राणां संघटनं न दृश्यते। तथा हि –

1. आर्धधातुकं शेषः3/4/114
2. कृदतिङ् 3/1/93
3. अपृक्त एकालत्पत्ययः 1/2/41
4. तत्रोपपदं सप्तमीस्थम् 3/1/92
5. कृत्याः प्राङ्ण्वुंल् 3/1/95

एतेषु संज्ञाविधायकेषु सूत्रेषु आर्धधातुकः, कृत्, अपृक्तः, उपपदम्, कृत्याः इति एतानि संज्ञावाचकानि पदानि सूत्रेषु आदौ प्रयुक्तानि विद्यन्ते। पूर्वोचारितः संज्ञी इति नियमस्यात्र व्यतिक्रमः दृश्यते।भाष्यकृता न किमपि प्रोक्तं नापि वार्त्तिक कृता।वस्तुगत्या संज्ञासंज्ञिनाम् अथवा संज्ञात्वसिद्धिविचारः संज्ञाधिकारात् भवितुं नार्हति। तथा चोक्तम्-

"[20]आचार्यपारम्पर्यात् उपदेशसिद्धिः संज्ञाधिकारात् संज्ञासिद्धिः"

एवंभावेन पाणिनीयव्याकरणे 200 संख्यकाः पारिभाषिकशब्दाः विद्यन्ते येषां विभाजनं भागत्रयेण विहितमवाप्यते-

1. [21]शब्दसंज्ञा 2. [22]अर्थसंज्ञा 3.[23]धर्मसंज्ञा

चेति भावेन वृद्धि,गुणः,संयोगः, सवर्णः, प्रगृह्य, टि, घु,नदी, आर्थधातुक इत्यादयः शब्दसंज्ञा। विभाषा, लोपः, सम्प्रसारणम् इत्यादयः अर्थसंज्ञा। उदात्तः, अनुदात्तः स्वरितश्चेति धर्मसंज्ञा।

**सहायकग्रन्थसूची-**


1. महाभाष्य-भाग-1-6-पतञ्जलिः पं शिवदत्तशर्मा-चौखम्बा संस्कृत पतिष्ठान, दिल्ली-1977
2. न्यास- जिनेन्द्रबुद्धि, काशिकावृति द्रष्टव्या
3. वृहच्छव्देन्दु शेखरः-नागेशभट्ट विरचित, डा.श्री सीतारामशास्त्री-संम्पुर्णानन्द संस्कृत विश्वविद्यालयः
4. अष्टाध्ययी सूत्रपाठ-रामलालकपुरष्ट्,वहालगड,हरियाणा-1977
5. Studies of Sanskrit grammar- SK Velvekar-Bharatiya vidyaprakash-1976


[20]S.K.Belvelkar-student of Sanskrit Grammar-page-10-11

[21]म.भा.1/1/43

[22]म.भा. 1/143

[23]का.त्या.पृ.307 प्र.भा.